Roll No.................

# 11101

## कक्षा 11वीं वार्षिक परीक्षा, 2024-25

[053]

# SANSKRIT

# संस्कृत

[Total No. of Questions: 23] [Total No. of Printed Pages: 08]

[Time: 03 Hours] [Maximum Marks : 80]

*निर्देशाः –*

*(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।*

*(ii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत।*

*(iii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।*

प्र.1 उचितं विकल्पं चित्वा लिखत – (1×6=6)

(i) 'महाराजस्य सुन्दरं मुखम् अस्ति' अत्र विशेषण–पदम् अस्ति –

(अ) मुखम् (ब) सुन्दरं

(स) महाराजस्य (द) अस्ति

(ii) 'वीरः सर्वदमनः शावकस्य दन्तान् गणयति' वाक्येऽस्मिन् विशेषणपदम् अस्ति –

(अ) वीरः (ब) सर्वदमनः

(स) शावकस्य (द) दन्तान् गणयति

(iii) 'मेधावी अमात्यः राज्ये निवसति' अस्मिन् वाक्ये विशेष्य–पदम् अस्ति –

(अ) राज्ये (ब) मेधावी

(स) निवसति (द) अमात्यः



https://www.mpboardonline.com

(iv) 'निर्मलं जलं जनाः पिबन्ति' वाक्येऽस्मिन् विशेष्यपदम् अस्ति –

(अ) पिबन्ति (ब) जनाः

(स) जलं (द) निर्मलं

(v) पञ्चमी–विभक्तेः एकवचनरूपं भवति –

(अ) रामाय (ब) रामस्य

(स) रामात् (द) रामम्

(vi) अधोलिखितेषु द्वितीया–विभक्तियुक्तं पदम् अस्ति –

(अ) लता (ब) लताम्

(स) लतया (द) लतायाम्

प्र.2 प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत – (1×6=6)

(i) 'वायुः सर्वत्र विद्यते' इत्यत्र .............................. अव्ययः अस्ति। (ईश्वरः / सर्वत्र / विद्यते)

(ii) 'तत्र विद्यालयः अस्ति' इत्यस्मिन् वाक्ये .............................. अव्ययः अस्ति। (अस्ति / तत्र / विद्यालयः)

(iii) 'अचिरं गृहं गच्छ' अत्र .............................. अव्ययः अस्ति। (गृहं / गच्छ / अचिरं)

(iv) तुमुन् प्रत्ययस्य उदाहरणं .............................. अस्ति। (पठित्वा / पठितः / पठितुम्)

(v) 'खादित्वा' इति पदे .............................. प्रत्ययः अस्ति। (ल्यप् / क्त्वा / क्तवान्)

(vi) 'प्रतिदिनं संस्कृतं पठनीयम्' अत्र अनीयर – प्रत्यय युक्तं पदं .............................. अस्ति। (संस्कृतं / पठनीयम् / प्रतिदिनं)

प्र.3 शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत – (1×6=6)

(i) 'विद्यायाः आगमः' इति समस्तपदं विद्यागमः भवति।

(ii) 'महात्मा' इति पदे कर्मधारयसमासः अस्ति।

(iii) द्विगुसमासस्य उदाहरणं पञ्चपात्रम् अस्ति।

(iv) 'धृष्टश्च' इति पदस्य सन्धिविच्छेदः धृष्टः + च नास्ति।

(v) 'जगदीशः' पदे स्वरसन्धिः भवति।

(vi) 'सोऽपि' गुणसन्धेः उदाहरणम् अस्ति।



https://www.mpboardonline.com

प्र.4 उचितं युग्म–मेलनं कुरुत – (1×7=7)

| 'अ' | 'आ' |
|---|---|
| (1) लभते | (i) प्र – उपसर्गः |
| (2) खादामि | (ii) लृट् – लकारः |
| (3) अकरोत् | (iii) 'अनु' उपसर्गः |
| (4) पठिष्यति | (iv) 'अधि' उपसर्गः |
| (5) प्रभातम् | (v) उत्तमपुरुषस्य एकवचनम् |
| (6) अनुगमनम् | (vi) 'लङ्' लकारः |
| (7) अधिनायकः | (vii) 'लभ्' आत्मनेपदी धातुः |

प्र.5 अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत – (1×7=7)

(i) 'पण्डितः' इति पदस्य विलोमपदं लिखत।

(ii) 'असन्तोषः' इत्यस्य पदस्य विलोमपदं लिखत।

(iii) 'पुष्पम्' पदस्य पर्यायपदं लिखत।

(iv) 'मूर्ध्नि' पदस्य पर्यायपदं लिखत।

(v) रामः कं पाणिना परिजग्राह?

(vi) वेदस्य मुखं किं स्मृतम्?

(vii) व्यायामं कदा वर्जयेत्?

**अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृत–भाषायां लिखत –**

प्र.6 महात्मनः व्रतानि कानि आसन्? (2)

<u>अथवा</u>

समृद्धिः केषां जायते?




https://www.mpboardonline.com

प्र.7 मन्त्रः कीदृशः भवति? (2)

अथवा

राज्ञां विजयमूलं किं भवति?

प्र.8 व्यायामं कदा वर्जयेत्। (2)

अथवा

शिशिरे कीदृशम् गृहमाश्रयेत्।

प्र.9 ब्रह्मणि चित्तं स्थिरं कर्तुं किम् आवश्यकम्? (2)

अथवा

कस्मिन् रताः जनाः ब्रह्म प्राप्नुवन्ति?

प्र.10 राजा बालं किम् अपृच्छत्? (2)

अथवा

महाराजा बालं कति वारम् अपश्यत्?

प्र.11 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य – पुस्तकात् एकं सुभाषितं लिखत – (2)

प्र.12 रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं कुरुत – (कौ द्वौ) (2)

(i) <u>महाराजस्य</u> मुखे तिलकालङ्कारः आसीत्।

(ii) राजा <u>बालाय</u> सताम्बूलम् उत्तरीयवस्त्रम् अयच्छत्।

(iii) <u>सुब्बण्णः</u> पितुः पार्श्वे महाराजं सविस्मयं पश्यति स्म।

प्र.13 अधोलिखितानि वाक्यानि 'कः' 'कम्' प्रति कथयति इति लिखत – (कौ द्वौ) (2)

(i) जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये।

(ii) अथ कोऽस्य व्यपदेशः।

(iii) रोचते मे एष मयूरः।

प्र.14 वेदाङ्गानि कति सन्ति? तेषां नामानि लिखत। (2)

अथवा

कति पुराणानि सन्ति? चतुर्णां पुराणानां नामानि लिखत।

प्र.15 रामायणस्य लेखकः कः? ग्रन्थेऽस्मिन् कति काण्डानि लिखत। (2)

अथवा

श्रीमद्भगवद्गीता कस्मात् ग्रन्थात् उद्धृता अस्ति, कति अध्यायाः सन्ति इति लिखत।



https://www.mpboardonline.com

प्र.16 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृत भाषायां लिखत – (1×3=3)

सहसा कोलाहलः श्रुतः। मुनिः बहिरागत्य अपश्यत्। केचन जनाः एकं बालकं ताडयन्ति। तं च भर्त्सयन्ति। बालकः भयेन कम्पते क्रन्दति च। मुनिः तत्र उपस्थितः। जनान् वारयित्वा अपृच्छत्। किम् अभवत्? किमर्थं भवन्तः एनं ताडयन्ति? जनाः अवदन् एष मिथ्यावादी, सदैव मिथ्याभाषणं करोति।

प्रश्नाः –

(i) केचन जनाः कं ताडयन्ति?

(ii) कः भयेन कम्पते क्रन्दति च?

(iii) मुनिः कान् वारयित्वा अपृच्छत्?

अथवा

अथ किञ्चित् कालानन्तरं तत्र समागतो राजा समुपविश्य पुराणम् आकर्णयति स्म। पितुः पार्श्वे उपविष्टः सुब्बण्णः पुराणप्रवचनं कुतूहलेन शृण्वन्नेव मध्ये महाराजम् अपि सविस्मयं पश्यति स्म। महाराजस्य सुन्दरं मुखम्, मुखे बृहत्ति – लकालङ्कारः, तत्रापि विशालस्य गण्डस्थलस्य शोभावहं श्मश्रुकूर्चम् इत्यादि सर्वमपि तस्य विस्मयकारणमासीत्।

प्रश्नाः –

(i) कस्य सुन्दरं मुखम्, मुखे बृहत्तिलकालङ्कारः?

(ii) पितुः पार्श्वे उपविष्टः कः पुराणप्रवचनं कुतूहलेन शृण्वति?

(iii) किञ्चित् कालानन्तरं तत्र कः समागतः?

प्र.17 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (1×3=3)

श्रेयो हि ज्ञानम् – अभ्यासात् ज्ञानात् – ध्यानं विशिष्यते। ध्यानात् कर्म – फलत्यागः, त्यागात् – शान्तिः – अनन्तरम्।।

प्रश्नाः –

(i) ध्यानं कस्मात् विशिष्यते?

(ii) ज्ञानं कस्मात् श्रेयः भवति?

(iii) शान्तिः कस्मात् भवति?

अथवा

अभ्यासेऽपि – असमर्थः – असि, मत्कर्म – परमो – भव।
मदर्थमपि कर्माणि कुर्वन् – सिद्धिम् – अवाप्स्यसि।।

प्रश्नाः –

(i) कस्मिन् अपि असमर्थः असि?

(ii) कीदृशः भव?

(iii) किमर्थं कर्माणि कुर्वन् सिद्धिम् अवाप्स्यसि?



https://www.mpboardonline.com

प्र.18 अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – (1×3=3)

तन्तुवायः – महाराज! किमिदं विधीयते? किम् – अयम् – एव न्यायः?

वै. गौराङ्गः – गच्छ गच्छ। नाहं न्यायम् – अन्यायं वा जानामि। यन्मया निश्चीयते दीयते च तदेव मूल्यम्। (उभौ तद्दत्तं मूल्यं गृह्णीतः)

उभौ तन्तुवायौ – नातः परं पटं निर्मास्यावः (इत्युक्त्वा गच्छतः)

वै. गौराङ्गः – (अनुचरमुद्दिश्य) पश्य। एताभ्यां बह्वीर्मुद्रा ग्रहीष्ये। अनिर्वचनीयम् एतत्पटयोः सौन्दर्यम्।

अति – सूक्ष्मतरोऽयं पटः। पश्य, एतस्य पञ्चषैः पटलैः परिवेष्टितमप्यपटमेव – प्रतीयतेऽङ्गम्। आः कथमेतत्समक्षमस्मद्देशीयानां पटानां विक्रयो भविष्यति, इति हतमस्मद्देशीयं वाणिज्यम्। (पुनर्विचिन्त्य)

प्रश्नाः –

(i) एतत्पटयोः सौन्दर्यं कीदृशम्?

(ii) कः अति – सूक्ष्मतरः?

(iii) 'किम् – अयमेव न्यायः' इति कः कथयति?

अथवा

बालः – जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये।

प्रथमा – अविनीत! किं नोऽपत्यनिर्विशेषाणि सत्वानि विप्रकरोषि? हन्त! वर्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।

दुष्यन्तः – किं न खलु बालेऽस्मिन् औरस इव पुत्रे स्निह्यति मे मनः? नूनमनपत्यता मां वत्सलयति।

द्वितीया – एषा खलु केसरिणी त्वां लङ्घयिष्यति यद्यस्याः पुत्रकं न मुञ्चसि।

बालः – (सस्मितम्) अहो, बलीयः खलु भीतोऽस्मि। (इत्यधरं दर्शयति)

प्रथमा – वत्स! एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।

बालः – कुत्र देहि तत् (इति हस्तं प्रसारयति)

प्रश्नाः –

(i) केन सर्वदमन इति कृतनामधेयः?

(ii) का त्वां लङ्घयिष्यति?

(iii) 'औरस इव पुत्रे स्निह्यति मे मनः' इति कः कथयति?



https://www.mpboardonline.com

प्र.19 रिक्तस्थानानि पूरयत – (केचन त्रयः) (1×3=3)

(i) षड्दोषाः ........................................................................................................ हातव्याः।

(ii) रामः ददर्श दुर्दर्शं युगान्ते ........................................................................... यथा।

(iii) ततस्तीरे ............................................................................................................ यथा।

(iv) अस्ति भुवो मेखलेव ........................................................................ नाम्ना सत्याग्रहाश्रमः।

(v) ग्रीष्मे घृतं पयः ......................................................................................................... नाम।

...................................................................................................... भजन् ग्रीष्मे न सीदति।

प्र.20 अधोलिखितम् अपठितगद्यांशं पठित्वा चतुर्णां प्रश्नानाम् उत्तराणि संस्कृते लिखत – (1×4=4)

संस्कृता परिष्कृता व्याकरण – सम्बन्धि दोषरहिता भाषा संस्कृतभाषेति निगद्यते। सर्वविध–दोषरहितत्वादियं भाषा देवभाषा, गीर्वाणभाषा इत्यादिभिः शब्दैः संबोध्यते। संस्कृतभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा अस्ति। संस्कृतभाषायामेव अष्टादश पुराणानि सन्ति, चत्वारो वेदाः उपनिषदः च अस्यां भाषायामेव सन्ति। षोडशसंस्काराणां वैधकशास्त्राणां च रचना संस्कृतग्रन्थेषु एव अस्ति। एषा भाषा सर्वभाषाणां जननी अपि अस्ति। संस्कृतभाषैव भारतस्य प्राणभूता भाषा अस्ति। इयमेव सम्पूर्णं भारतदेशम् एकसूत्रे बध्नाति।

प्रश्नाः –

(i) विश्वस्य सर्वासु भाषासु प्राचीनतमा का भाषा अस्ति?

(ii) सर्वभाषाणां जननी का अस्ति?

(iii) संस्कृतभाषा कस्य प्राणभूता भाषा अस्ति?

(iv) षोडशसंस्काराणां रचना केषु ग्रन्थेषु एव अस्ति?

(v) संस्कृतभाषा एकसूत्रे कं बध्नाति?

(vi) वेदाः कति सन्ति?

प्र.21 सङ्केताधारितं कथा लेखनं कुरुत – (4)

(तीरे, विन्ध्याटवी, कोटरे, पद्मसरः)

अस्ति मध्यदेशालङ्कारभूता मेखलेव भुवो .................. नाम। तस्यां च पम्पाभिधानं ...............।

तस्य पश्चिमे ............................................................................................ महाजीर्णः शाल्मलीवृक्षः।

तस्यैवैकस्मिन् ............................ निवसतः कथपि पितुरहमेव सुनुरभवम्। ममैव जायमानस्य प्रसववेदनया जननी मे लोकान्तरमगमत्। https://www.mpboardonline.com

अथवा

(जनाः, पङ्कोद्धारो, रुग्णा, मुनिः)

एकदा ...................................................................................................... चिन्तामग्नः – केन प्रकारेण

इमे ............................................................................................................ बोधयितत्याः? पुष्करिणीतः

............................ न भवति। प्रतिदिनं च जलं प्रदूषितं भवति। तत् प्रदूषितं जलं पीत्वा जना

अपि ........................................................................................................................... भवन्ति।



https://www.mpboardonline.com

प्र.22 शुल्कमुक्त्यर्थं स्वस्य प्राचार्यस्य कृते आवेदन पत्रं संस्कृते लिखत। (4)

<u>अथवा</u>

स्वस्य प्राचार्यस्य कृते अवकाशार्थं प्रार्थनापत्रं लिखत।

प्र.23 अधोलिखितेषु एकस्य कवेः परिचयं शतशब्देषु संस्कृते लिखत –

(i) आदिकविः वाल्मीकिः

(ii) महाकविः कालिदासः

(iii) वेद्व्यासः

(iv) बाण भट्टः

---



https://www.mpboardonline.com